International Journal of Sanskrit Research 2024; 10(4): 326-332

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 326-332
© 2024 IJSR
www.anantaajournal.com
Received: 12-06-2024
Accepted: 18-07-2024

डा. कनपाल कुमारः
सहायकाचार्यः, अनुवादविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
आंध्रप्रदेशः, भारतम्

Corresponding Author:
डा. कनपाल कुमारः
सहायकाचार्यः, अनुवादविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
आंध्रप्रदेशः, भारतम्

श्रीमद्रामायणम् : अनुवादाः रूपान्तरणानि च

डा. कनपाल कुमारः

DOI: https://www.doi.org/10.22271/23947519.2024.v10.i4e.2696

प्रस्तावना

कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीकथाम्।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः [1]।।

वाल्मीकिमहर्षेः मुखारविन्दात् निःसृतस्य श्रीमद्रारामायणस्य महत्त्वं विश्वे प्रसिद्धमिति सर्वैः ज्ञायते। भगवतः श्रीरामस्य चरितम् अस्मिन् महाकाव्ये सरलया भाषया, सुमनोहरतया च वर्णितं वर्तते। रामादिवत् वर्तितव्यं न तु रावणादिवत् इत्युक्त्या रामः सर्वश्रेष्ठः आदर्शः पुरुषः इति तस्य मार्गमेव सर्वे अनुसरन्तु इति च एतस्य रामायणस्य मुख्यमुद्देश्यं वर्तते। अतः एव रामायणं सर्वजगद्रक्षकम् इति वक्तुं शक्यते। इदमतिरिच्य रामायणं सर्वासां विद्यानां, कलानां ज्ञानस्य च आकरः एव। सर्वैः मानवैः एनं ग्रन्थं पठित्वा स्वजीवनं सार्थकं कृत्वा भगवतः सान्निध्यं प्राप्तव्यम्।
रामायणविषये “काव्यबीजं सनातनम्[2]” इत्युक्तिः यथार्था प्रतीयते, यतः समस्तकाव्यानां बीजं रामायणे निहितं वर्तते। उच्यते यत् श्रीव्यासदेवादिभिः महद्भिः कविभिः रामायणमधीत्यैव पुराणमहाभारतादीनां प्रणयनं कृतम्। नैकेषु पुराणेषु रामायणस्य माहात्म्यं गीतं वर्तते। रामायणस्य महत्त्वकारणादेव अस्य ग्रन्थस्य सर्वासु भारतीयभाषासु भारतीयेतरभाषास्वपि अनुवादाः रूपान्तरणानि वा संजातानि सन्ति। कियन्ति रामायणानि इत्येतत् प्रतिपादिका कथापि काचित् श्रूयते। तदनु प्रायः त्रिशतमिति संख्या परिगणिता वर्तते[3]। अस्य श्रीमद्वाल्मीकिरामायणस्य शब्दानुवादः, भावानुवादः, अर्थानुवादः, यथामूलानुवादः, सारानुवादः, संग्रहानुवादः विभिन्नासु भाषासु लभ्यते। गीताप्रेस गोरखपूर् द्वारा अपि बह्वीसु भारतीयभाषासु यथामूलानुवादः प्राप्यते येन रामायणं समूलं पिपठीषूणां मार्गः सुलभः संजातः वर्तते।
भारतीयज्ञानपरम्परायाः श्रीमद्वाल्मीकिरामायणस्य निश्चप्रचम् अनन्यसाधारणमहत्त्वम्। कालप्रवाहे संस्कृतात् प्राकृतभाषाः समजायन्त। प्रकृतिः यासां संस्कृतं ताः प्राकृतभाषाः। प्राकृतभाषाः यदा व्यवहारभाषाः अभवन् तदा संस्कृतभाषायाः अप्रतिपत्तेः कारणात्

---

[1].म.सु.सं – 9.1.26
[2].बृ.ध.पु- 1.30.47
[3].ए.के.रा.ले -1987

समाजस्य आवश्यकतानुगुणं वाल्मीकिरामायणस्य विभिन्नासु भारतीयभाषासु भारतीयेतरभाषासु च अनुवादस्य परम्परा समारब्धा। अन्यदृष्ट्या च पाश्चात्यं जगत् प्राच्यविद्यया परिचितं भवतु इत्येतदर्थमपि अनुवादस्य या परम्परा आरब्धा तत्र रामायाणानुवादस्यापि महत्त्वपूर्णं स्थानं वर्तते। एड्वर्ड् सईद् महोदयस्य ओरियन्टालिशम् तथा तेजस्विनी निरञ्जनमहोदयायाः सिट्टिंग् ट्रान्सलेशन् इत्येतयोः ग्रन्थयोः अस्योल्लेखः प्राप्यते।

अनुवादस्य परिप्रेक्ष्ये रामायणम् इति महान् चर्चणीयः अनुसन्धेयश्च विषयोऽस्ति। तदर्थमादौ अनुवादस्य अवधारणा विचारणीया भवति। अनुवादो नाम अनुसृत्यकथनम्, पुनः कथनम्, उक्तस्य प्रतिपादनम्, ज्ञातस्य प्रतिपादनम्, विधिविहितस्य नियमेन उपस्थापनम् इति। महतः अस्य काव्यस्य विषये तावत् अनुवादः रूपान्तरणञ्च इत्येतत् पक्षद्वयमपि विचिन्त्यं भवति। कस्याश्चित् भाषायां लिखितसामग्री अन्यया भाषया विना भावपरिवर्तनम् अनूद्यते अनुवादप्रक्रियायाम्। प्रत्युत रूपान्तरणप्रक्रियायां मूलमनु साहित्यसामग्र्याः प्रसङ्गेषु, पात्रेषु, आकारे परिवर्तनं क्रियते। अनुवादप्रक्रियायां केवलं भाषा भिद्यते किन्तु रूपान्तरणप्रक्रियायां तु भाषा, वस्तूनि, प्राणिनः, वेशभूषा, प्रसङ्गाः वा भिद्यन्ते। अनुवादे मूलार्थः, भावार्थः, प्रयोगवैशिष्ट्यम्, शैली, विषयवस्तु, सांस्कृतिकवैशिष्ट्यानि यथाशक्यं यथावत् संरक्ष्यन्ते। रूपान्तरणे तावत् लेखकानुकूलं परिवेषानुकूलं परिवर्तनानि भवन्ति।

अनुवादस्य भिन्नाः परिभाषाः परिशीलयामश्चेत् रामायणस्य नैकानि रूपान्तरणानि अनुवादपरिधौ एव समायान्ति। अत्र त्रिधा विचारः क्रियते। अनुवादस्य प्रकारेषु यथामूलानुवादः, छायानुवादः, स्वेच्छानुवादः इत्येतेषां त्रयाणां प्रतिबिम्बं द्रष्टुं शक्यते। यथामूलानुवादे मूलभाषायां विद्यमानानि चरित्राणि, प्रसङ्गाः यथावत् लक्ष्यभाषायाम् अनूद्यन्ते। न केवलं तावत् यदि सः पद्यानुवादश्चेत् यावन्ति पद्यानि मूलभाषायां विद्यन्ते तावन्ति एव लक्ष्यभाषायां विरच्यन्ते। अत्र केवलं भाषाभिन्नता इत्येतदेव वैशिष्ट्यं भवति। मूलपाठे निष्ठावान् अनूदितः पाठः भवति। आङ्ग्लभाषायाम् इदम् आयकाँनिक् रिलेषन् इत्युच्यते। अनया दृष्ट्या गीताप्रेस गोरखपुरद्वारा वाल्मीकिरामायणस्य ये ये अनुवादाः समुपलभ्यन्ते तत्र सर्वत्रापि आयकाँनिक्-सम्बद्धः विद्यते। उदाहरणार्थम् –

> गौतमस्य नरश्रेष्ठ पूर्वमासीत् महात्मनः।
> आश्रमो दिव्यसंकाशः सुरैः अपि सुपूजितः [4]।।

आन्ध्रभाषानुवादः - ओ नरश्रेष्ठ, पूर्वं दिव्यसंकाशंतो, देवतलचे पूजिंपबडिन ई आश्रमं गौतमुडने महात्मुनिदि।

अत्र द्वितीयः सम्बन्धः भवति इण्डेक्सिकल् रिलेषन् इति। छायानुवादः अस्यैव परिधौ समायाति। अत्र मूलभाषायाः लक्ष्यभाषायाम् अनुवादावसरे मूलभाषायाम् अविद्यमानाः किन्तु तत्सम्बद्धाः एव नैके विषयाः योजिताः भवन्ति। यथा- लोकगीतानि, काव्यात्मकपरम्पराः, यस्यां भाषायाम् अनूद्यते तत्सम्बद्धस्थानीयविषयाः इत्यादि। कम्बनरामायणम् एवं कृत्तिवासरामायणञ्च अस्य उदाहरणत्वेन स्वीकर्तुं शक्यते। यथा – रामविवाहप्रसङ्गः कृत्तिवासरामायणे वङ्गपद्धत्यैव वर्णितः वर्तते। अत्र मूलकथायां वा तथा क्रमे वा चरित्रेषु वा भेदः न भवति। केवलं तदनुकूलाः अन्यान्यविषयाः योजिताः भवन्ति। इदमेव इण्डेक्सिकल् रिलेषन्।

अत्र तृतीयः सम्बन्धः भवति सिम्बालिक् रिलेषन् इति। स्वेच्छानुवादः अस्यैव परिधौ समायाति। अत्र मूलभाषायाः कथा वा चरित्राणि वा नामानि वा उपयुज्य पूर्णतया नूतनविषयम् उपस्थापयितुम् प्रयासः क्रियते। अत्र लक्ष्यभाषायां विद्यमानं चित्रं पूर्णतया भिन्नं भवति। अत्र मूलपाठः अनुवादश्च इत्येतयोः महदन्तरं भवति। यथा वाल्मीकिरामायणं तथा विमलसूरेः जैनपाठः, वाल्मीकिरामायणं तथा थाई भाषायाः रामकीर्तिः इति। एतेषु उदाहरणेषु सिम्बालिक् रिलेषन् प्राप्यते।

अनुवादः एका विस्तृतसंकल्पना वर्तते। अत्र मूलस्य ग्रन्थस्य श्रीमद्वाल्मीकिरामायणस्य श्लोकशः विविधासु भाषासु कृताः अनुवादाः तथा सर्वेऽपि टीकाग्रन्थाः ये च संस्कृतेन तथा अन्यान्यभाषासु सन्ति ते सर्वेऽपि अनुवादत्वेनैव अङ्गीकर्तुं शक्यन्ते। न केवलम् एतत् पूर्वोक्त आयकाँनिक्-इण्डेक्सिकल्-सिम्बालिक्सम्बन्धेन रूपान्तरणानि अपि अनुवादत्वेन ग्रहीतुं शक्यन्ते। भारतीयसाहित्यस्य अनुवादस्य च अध्येता ए.के.रामानुजन् महोदयः विविधभाषासु रामायणस्य संङ्ख्यां त्रिशतमिति निर्दिशति। रामायणस्य भारतीय-भारतीयेतभाषासु नैकानि संस्करणानि सन्ति। भारते एव मूलवाल्मीकिरामायणस्य नैकानि रूपाणि द्रष्टुं शक्यन्ते।

रामायणस्य भारतीय-भारतीयेतरभाषासु अनुवादविषये रूपान्तराणां विषये वा विद्यमानाः ग्रन्थाः तत्र तत्र विद्वद्भिः निर्दिष्टाः सन्ति। एतेषां संक्षिप्तपरिचयः नामनिर्देशमात्रं प्रदीयते। रामायणस्य प्रायः सर्वासु भारतीयभाषासु अनुवादाः अथवा रूपान्तराणि वा समुपलभ्यन्ते। क्रमेण तेषां परामर्शं स्वीकुर्मः।

हिन्दीभाषायां रामायणम् –

हिन्दीभाषायाः अवधीभाषा व्रजभाषा चेति उपभाषयोः विरचितानि रामायणानि महता प्रमाणेन प्रसिद्धिं गतानि। तत्र अवध्यां गोस्वामितुलसीदासरचितं रामचरितमानस

[4].वा.रा.बा.का. श्लो.सं – 1.48.15

इति रामभक्तिपरकग्रन्थेषु श्रेष्ठः ग्रन्थः। तदनु अग्रदासस्य ध्यानमञ्जरी, स्वामिरामानन्दस्य हनुमान् स्तुति, प्राणानन्दचौहानस्य रामायण महानाटक, हृदयरामस्य हनुमान नाटक, नाभादासस्य अष्टयाम, लालदासस्य भक्तियुग तथा अवधविलास, मधुसूदनदासस्य रामश्वमेध, महाराजस्य विश्वनाथस्य आनन्दरघुनन्दन, बनादासस्य उभय प्रबोधक रामायण इत्येतानि रूपान्तरणानि लभ्यन्ते। व्रजभाषायां तावत् स्वामिरामानन्दस्य रामार्चन पद्धति, वैष्णवमताब्ज भास्कर, रामरक्षा स्तोत्र, ईश्वरदासस्य भरतमिलाप तथा अंगद पैज, विष्णुदासस्य रामायणकथा, सूरदासस्य सूरसागर, तुलसीदासस्य विनयपत्रिका गीतावली तथा दोहावली, प्राणचंद चौहानस्य महानाटक, हृदयनारायणस्य हनुमन्नाट का अनुवाद, केशवदासस्य रामचद्रिका इत्येतानि उपलभ्यन्ते। आधुनिके कालेऽपि हिन्द्यां रामायणसम्बद्धाः ये ग्रन्थाः विरचिताः तत्र पण्डितराधेश्यामवर्यस्य राधेश्याम रामायणी इति सम्पूर्णचरित्रात्मकं रामायणं नितरां प्रसिद्धं वर्तते।

असमियाभाषायां रामायणम्

आधुनिक भारतीय भाषासु सर्वप्रथमम् असमिया भाषायामेव रामायणीकथा उपलभ्यते। चतुर्दशे शतके माधवकन्दलिद्वारा विरचितं सप्तकाण्डरामायणाख्यं रामायणमिदम्। अनन्तकन्दलिकवेः पातालखण्डरामायण तथा जीवस्तुतिरामायण, हरिहरविप्रस्य लवकुश युद्ध, दुर्गावरकायस्थस्य गीतिरामायण, अनन्त ठाकुर अता इत्यस्य श्रीरामकीर्तन, रघुनाथमहन्तस्य अद्‌भुत रामायण तथा कथा रामायण, श्रीराम अता इत्यस्य अध्यात्मरामायण इत्येतानि अपि उल्लेखनीयानि।

पंजाबीभाषायां रामायणम्

हरि जी बनाम सोढी मिहरबान इत्यस्य आदिरामायणम्, हृदयरामभल्ला इत्यस्य हनुमान्नाटकम्, कपूरचन्दत्रिखा इत्यस्य रामायण, साहिबदासस्य लवकुशकथा, गुलाबसिंहनिर्मला इत्यस्य अध्यात्मरामायणम, संन्तोकसिंहस्य वाल्मीकिरामायण एवं विख्यातानि अस्मिन्नेव क्रमे रामचन्द्रिका, रामचरित्ररामायण, रामचन्द्रोदय, रामावतार, साररामायण, कीरतरामायण, अनूपरामायण, सतसईया रामायण इत्यादीन्यपि प्रख्यातानि विद्यन्ते।

ओरियाभाषायां रामायणम्

पञ्चदशशताब्द्यां सिद्धेश्वरदासेन विचित्ररामायण तथा विलङ्कारामायण ओरियाभाषायां विरचितम्। रामकथाकारेण बलरामदासेन जगन्नाथमन्दिरे जगमोहनमण्डपे रामायणमेकं विरचितम्। इदं जगमोहनरामायणं नाम्ना प्रसिद्धिं गतम्। इदं दाण्डि इति छन्दसि विरचितम् अतः अस्य दाण्डिरामायण इत्यपि ज्ञायते। अर्जुनदासस्य रामबिबा, धनञ्जयभञ्जस्य रघुनाथविलास, उपेन्द्रभञ्जस्य वैदेहीविलास, विश्वनाथखुण्टिया इत्यस्य विचित्ररामायण, त्रिपुरारिदासस्य रामकृष्ण केलि कल्लोल इत्यादयो ग्रन्थाः समुपलभ्यन्ते।

कन्नडभाषायां रामायणम्

कन्नडभाषायाम् एकादशशतकादारभ्य नवदशशतकपर्यन्तं प्रायः पञ्चविंशतिग्रन्थाः रामायणसम्बद्धाः विरचिताः। एकादशे शतके नागचन्द्रेण विरचितं रामचरितपुराण एवं पम्परामायण इति विख्यातम्। इदं जैनरामायणेषु उत्तमं काव्यम् एवं श्रीरामपट्टाभिषेक, उत्तररामायण, अद्वैतरामायण, भुवनैक्यरामायण, कुमुदेन्दुरामायण, अध्यात्मरामायण, शङ्कररामायण, जिनरामायण, शेषरामायण इत्यादयः पञ्चविंशतिग्रन्थाः। तत्र तोरवे रामायण अतिशेते। तस्याधारः मूलं वाल्मीकिरामायणम्। रचयिता च कुमारवाल्मीकिः इति। एवं कन्नडभाषायाः राष्ट्रकविः कुवेम्पु इत्यस्य श्रीरामायणदर्शनम् इति महाकाव्यम् अपि विश्वसाहित्ये अन्यतमं स्थानमलङ्करोति।

तमिलभाषायां रामायणम्

रामचरित्रेण सह "सीतायाः चरितं महत्" इत्युक्तिः तुलसीदासकारणात् तथा कम्बनकवेः कारणात् सार्थकतां गतास्ति। कम्बनस्य काव्ये सीतायाः विशेषं स्थानं वर्तते। एकादशशताब्द्यां कम्बनेन इरामावताराम् इति ग्रन्थः विरचितः। अयमेव कम्बरामायण इति प्रसिद्धः।

मलयालभाषायां रामायणम्

षोडशशतके एषु तत्च्छनद्वारा रचितम् अध्यात्मरामायणकिलिपाट्टु इति प्रसिद्धं वर्तते। अत्र किलि नाम पक्षी, पाट्टु नाम गीतम् इति अतः पक्षिमाध्यमेन गेयात्मकशैल्या विरचितं रामायणमिदम्। ततः पश्चात् केरलवर्मारामायण, पातालरामायण इत्येतद्वयं केरलवर्मणः काव्यं प्राप्यते। केरलवर्मारामायण 'वाल्मीकि रामायण किलिपाट्टु' इत्यनेन नाम्नापि प्रसिद्धम्। कोट्टारक्करा तम्पुरान विरचितं रामनाट्टन इति आट्टक्कथा (कथकलिपद) रूपेण विरचितमस्ति। अषकत्तु पद्मनाभ कुरुप कृतं रामचन्द्रविलासः इति संस्कृतशब्दप्रचुरं मलयालमहाकाव्यं वर्तते। एतदतिरिच्य आधुनिकग्रन्थाः अनेके उपलभ्यन्ते।

तेलुगुभाषायां रामायणम्

रामेण तस्य दण्डकारण्यवासः आन्ध्रदेशे एव व्यापितः भद्राचलप्रदेशः तत्पदधूलिपवित्रः । तेलुगुभाषायां रङ्गनाथरामायणं प्राचीनतमं मन्यते। त्रयोदशशताब्द्यां गोनबुद्धारेड्डि विरचितम्। चतुर्दशशतके विरचितं भास्कररामायणं चम्पूशैल्याविरचितम्। अस्य विविधानि

काण्डानि, विविधैः विरचितानि सन्ति। तस्मिन्नेव काले लेखिकया आतुकूरि मोल्ल द्वारा चम्पूशैल्याविरचितं मोल्लरामायणमपि प्रसिद्धिं गतम्। तत्रैव चतुर्दशे शतके काचविभुडु, विठ्ठलविभुडुद्वारा उत्तररामायणं तथा षोडशे शतके कंकटिपापराजुविरचितम् उत्तररामायणम् इत्येतौ ग्रन्थौ तेलुगुभाषायां प्रधानौ। अष्टादशशताब्द्यां कूचिमंचितिम्मकविना विरचितं अच्चतेलुगुरामायणम् अति प्रसिद्धम्। आधुनिके काले श्रीमद्रामायणकल्पवृक्ष इति विश्वनाथसत्यनारायणस्य ज्ञानपीठपुरस्करप्राप्ता रचना वर्तते। अस्मिन् क्रमे एम्.एस्.रामारावस्य गीतिरामायणम् इति गीतिकाव्यमपि अत्यन्तं लोकप्रियं वर्तते।

मराठीभाषायां रामायणम्

मराठ्यां संस्कृतभाषायाः विदुषा साधुपुरुषेण एकनाथेन जनजागृतये लोकहिताय च भावार्थरामायणमिति काव्यं लोकभाषया एव विरचितम्। अधुनापि चातुर्मास्ये महाराष्ट्रे ग्रन्थस्यास्य पारायणं क्रियते। कवेः मुक्तेश्वरस्य संक्षेपरामायणम् अपि प्रसिद्धम्। भारतीयानां मनस्सु स्वराज्यभावनां जागरयितुं रचितमिदं काव्यम्। श्रीधरस्वामिविरचितं रामविजय इत्यपि लोकप्रसिद्धम्। समर्थरामदासस्य श्रेष्ठः शिष्यः गिरिधरस्वामी अब्दरामायण, मङ्गलरामायण, छन्दोरामायण, सुन्दररामायण, संकेतरामायण, करुणरामायण इत्येवं षण्णां रचनाम् अकरोत्। कविः मोरोपन्तः विभिन्नछन्दस्सु शैलीषु च अष्टोत्तरशतं रामायणानि विरचय्य मराठीसाहित्ये उन्नततमं स्थानमधिगतवानस्ति।

वङ्गभाषायां रामायणम्

पञ्चदशशतके कृत्तिवासः ओझा कृत्तिवासरामायण इत्यनेन नाम्ना प्रसिद्धस्य श्रीरामपाञ्चाली इत्यपरनामकस्य रामायणस्य रचनां कृतवान्। इदम् उत्तरभारतीयभाषासु प्रथमं मन्यते। सुखमयभट्टाचार्यस्य रामयणेर चरिताबली, अमलेशभट्टाचार्यस्य रामयाणकथा, कवयित्र्याः चन्द्रावत्याः चन्द्रावतीर् रामायण अपि विशिष्टं स्थानं भजन्ते। एतदतिरिच्य विंशतितमे शतके बहुभिः साहित्यिकैः रामायणाधारिताः नैकाः रचनाः विरचिताः सन्ति।

नेपालीभाषायां रामायणम्

नेपालीसाहित्ये भानुभक्तस्य रामायणम् आदि रामायणमिति मन्यते।

काश्मीरीभाषायां रामायणम्

काश्मीरिभाषायां रामकथाकाव्यरचनायाः परम्परा नवदशशतकात् जातास्ति। रामावतारचरित, शङ्कररामायण, आनन्दरामावतारचरित, विष्णु प्रतापरामायण, ताराचन्दरामायण, अमररामायण इत्येतानि लोकप्रियाणि सन्ति।

गुजराती भाषायां रामायणम्

गुजरातीभाषायां रामकथायाः मौखिकीपरम्परापि दृश्यते। तत्र आशानन्दस्य लक्ष्मणगान, माधोदासस्य रामरासौ, सायांजी झूला इत्यस्य अङ्गदविष्टि इत्येतानि चारणी (डिंगल) भाषया विरचितानि प्राप्यन्ते। एतदतिरिच्य गुजरातीभाषया ब्रह्मजिनदासस्य रामायणरास, हनुमन्तरास इत्येतौ ग्रन्थौ, लावण्यसमयस्य रावणमन्दोदरीसंवाद, भीमस्य प्रबोधचन्द्रोदय, मांडण बन्धारो इत्यस्य रामायण इत्येताः प्रमुखाः कृतयः सन्ति।

मणिपुरिभाषायां रामायणम्

लबंगसिंहकौन्थौजम्ब इत्येतस्य रामनोङगाबा इत्ययं ग्रन्थः उपलभ्यते।

मैथिलीभाषायां रामायणम्

मैथिलीभाषायां महाकविः चन्दा झा चन्द्ररामायण, महाकविलालदासः रमेश्वरचरितरामायण, सीतायन, अम्बचरित इत्येतान् ग्रन्थान् रचितवन्तौ।

उर्दू भाषायां रामायणम्

मुगलशासकस्य अकबरस्य आदेशेन अब्दुलबदायूनी वाल्मीकिरामायणस्य फारसी-अनुवादं कृतवान्। कविः शेख साद मसीह दास्तान-ए-राम व सीता इति रामकथामलिखत्। शाहजाहानशासनकाले दाराशिकोह, मुल्ला शेख सादुल्लाह, गिरदास च रामायणस्य फारसीभाषायाम् अनुवादं कृतवन्तः। जगन्नाथकुशरा अद्भुतरामायण इति छन्दोबद्धं रामायणमेकं रचितवानासीत्। अष्टादशे शतके द्वारकाप्रसाद उफुकः रामायण-यक-कापिया इति ग्रन्थं रचितवान्।

भारतीयेतरभाषासु रामायणम्

वैदिशिकभाषासु हंगेरियनभाषायां वाल्मीकिरामायणस्य अनुवादः 1977 तमे वर्षे जोसेफ वेकेरती इत्यनेन कृतः। वस्तुतः महाकविना युगीश्वरेण नवम्यां शताब्द्यां इन्डोनेषियायां रामायण-काकाबीन इति काव्यात्मकः अनुवादः कृतः आसीत्। थाई भाषायां प्रो.जया स्टेटस् द्वारा कृतः अनुवादोऽपि प्रसिद्धः वर्तते। एवं समग्रं रामायणस्य अनुवादपरम्परामतिरिच्य कस्यचित् विशिष्टभागस्य अनुवादपरम्परा अपि अवलोकयितुं शक्यते। यथा – रामायणस्य अरण्यकाण्डस्य सी.डेला कासा इत्यनया इटालियन् भाषायां कृतः अनुवादः। अपि च रामेकर इति कम्बोडियाभाषायाम्, हिक्यत् सिरिराम् इति मलेषियाभाषायां, रामवुतु इति बर्माभाषायाम् इति विभिन्नाः अनुवादाः दृश्यन्ते।

आङ्ग्लभाषायां रामायणग्रन्थस्य सर्वप्रथमम् आङ्ग्लानुवादः तदानीन्तनकाशीस्थ संपूर्णानन्द संस्कृत विश्वविद्यालयस्य आङ्ग्लभाषाविदुषा आर्.टी.एच् ग्रिफिथ

महोदयेन 1870 तमे वर्षे कृतः आसीत्। तस्य स्मारकचिह्नम् अद्यापि संपूर्णानन्दविश्वविद्यालये दृश्यते। ब्रिटिशकाले आङ्ग्लेयानां कृते संस्कृतभाषायाः महत्त्वं प्रदर्शयितुम् अनेन एतस्य रामायणस्य आङ्ग्लभाषायाम् अनुवादः अकारि ।

तत्काले तत्समाजे रामायणस्यानुवादस्य आवश्यकता

विंशतितम्यां शताब्द्याम् अनुवादः सामाजिक-अध्ययनरूपेण परिचितः। अस्य सांस्कृतिकक्षेत्रे सामाजिकक्षेत्रे शैक्षिकक्षेत्रे च महान् प्रभावोऽपि अजायत। अनया दृष्ट्या न केवलं राष्ट्रियं वाङ्मयम् अपि तु वैश्विकं वाङ्मयं जातमित्यत्र नास्ति सन्देहः। मम मत्या विदेशेषु राष्ट्रियसाहित्यस्य अपर्याप्ततायामपि रामायणादि भारतीयग्रन्थानाम् अनुवादस्य आवश्यकता अनुभूता। रामायणं कालातीत वाङ्ग्मयं वर्तते। न केवलं भारतस्य कृते अपि तु समग्रजगतः कृते प्रेरणाप्रदः अयं ग्रन्थः।

रामायणस्य अनुवादस्यावश्यकतायां तत्कालीनसमाजस्य प्रबोधनमुद्बोधनम् जागरणमित्येकं कारणमपि निर्देष्टुं शक्यते। यथा संस्कृतम् अजानतां जनानां कृते तेषु स्वधर्मभक्तिभावं जागरयितुं हिन्द्या रामचरितमानस् आविर्बभूव। अन्यदुदाहरणं नाम महाराष्ट्रे परकीयाणाम् आक्रमणेन पीडितेषु दुःखितेषु हतवीर्येषु जनेषु वीर्यं जागरयितुं वीररसप्रधानयुतं भावार्थरामायणम् आविर्बभूव। निष्कर्षे इदं वक्तुं शक्यते यत् अनुवादसन्दर्भे विभिन्नानाम् अनुवादप्रकाराणां प्रयोगादिकम् अनुवादकैः क्रियते। वस्तुतः शब्दानुवादः, अर्थानुवादः, यथामूलानुवादः, सारानुवादः, सङ्ग्रहानुवादः, स्वेच्छानुवादः, छायानुवादः इत्येवं प्रकारेण विभिन्नाः अनुवादप्रकाराः वर्तन्ते। सन्दर्भानुगुणम् आवश्यकतानुसारेण च एतेषाम् अनुवादप्रकाराणां प्रयोगः अनुवादकानां द्वारा अनुवादकृतिषु प्रयुज्यते। तेन अनूदिते ग्रन्थे विषयवर्णनसन्दर्भे अनुवादकस्य अभिप्रायादिकं, वर्णनादिकञ्च पाठकैः ज्ञातुं शक्यते। तद्वारा पाठकाः ये अनूदितग्रन्थस्य अध्ययनं कुर्वन्ति ते मूलग्रन्थस्थं वास्तविकं ज्ञानम् अवगन्तुमर्हन्ति। अतः मूलग्रन्थस्यावगमने अनुवादप्रकाराः उपयुक्ताः भवन्ति। अतः ऐतिहासिकग्रन्थानाम् अनुवादसन्दर्भे मूलग्रन्थस्य, मूललेखकस्य च मतं सुस्पष्टतया प्रतिपादयितुम् एते अनुवादप्रकाराः अत्यन्तावश्यकाः भवन्ति। अन्यथा अनूदितग्रन्थद्वारा अभीष्टज्ञानस्यापेक्षया अन्यदेव विपरीतं विषयप्रतिपादनं तत्र दृश्यते। उदाहरणार्थम् अधोप्रदत्तमंशं परिशीलयितुं शक्यते।

वाल्मीकिरामायाणस्य केषुचिदनुवादेषु रूपान्तरणेषु च कालानुसारं परिस्थित्यनुसारं च न केवलं स्वरूपम् अपि तु तदन्तर्वस्तु विषयवस्तु एव वा भिन्नं दृश्यते। यथा कुत्रचित् अहल्याप्रसङ्गे परिवर्तनं दृश्यते। कुत्रचित् शम्बूकवधविषये परिवर्तनं दृश्यते। बहुभिः अनुवादकैः कृतं कैकयीचरित्रचित्रणमपि अत्र उल्लेख्यं भवति। तस्याः चरित्रं बहुत्र सकारात्मकं बुहुत्र च नकारात्मकं वर्णनमस्ति। किन्तु तुलसीदासकृते रामायणे, कम्बन्-रामायणे, एकनाथकृते भावार्थरामायणे तु वाल्मीकिरामायणस्य एव आत्मा तिष्ठति। तत्र यथामूलानुवादस्य बाधः येन केन प्रकारेण न दृश्यते। मुघलकाले फारसीभाषायाम् अकबरेण अब्दुल कादिर बदायूनीद्वारा यः अनुवाद कारितः सः यथेच्छं कृतः अनुवादः। प्रभुत्वम् तथा अनुवादः इत्यनयोः अन्तःसम्बद्धपरिप्रेक्ष्ये क्रियमाणस्य अनुवादस्य इदमेकम् उदाहरणम्। एतादृशानुवादाः मूलकृतेः यथायथं न्यायं कर्तुं न पारयन्ति। यद्यपि इत्थं श्रीमद्वाल्मीकिरामायणं तावत् प्रवाहेऽस्मिन् अनूदितमाध्यमेन वा भवतु रूपान्तरणमाध्यमेन वा भवतु समस्तलोकमनांसि आ बहोः कालात् प्रभावयत् राजते भविष्यति च विराजिष्यते इति निश्चप्रचम्।

।। इति शम् ।।

सङ्केताक्षरसूची –

1. बृ.ध.पु-बृहद्धर्मपुराणम्।
2. म.सु.सं-महासुभाषितसङ्ग्रहः।
3. ए.के.रा.ले-ए.के.रामानुजन् लेखः, पीट्स्बर्ग यूनिवर्सिटी, पेनिन्स्लिया, अमेरिका।
4. वा.रा.बा.का.श्लो.सं–वाल्मीकिरामायणम् ।

सन्दर्भग्रन्थसूची

1. वाल्मीकि रामायण गीता प्रेस, गोरखपूर।
2. भारतीयभाषाओं में रामकथा, योगेन्द्रप्रतापसिंह, लोकभारती प्रकाशन इलाहबाद–2009.
3. साहित्य विविध आयाम, डा.रामप्रकाश, राधाकृष्ण प्रकाशन नई दिल्ली–2008.
4. संस्कृतसाहित्येतिहासः, डा.रामचन्द्रमिश्रः, चौखम्बा पब्लिसर्स, वाराणसी।
5. हिन्दी और भारतीय भाषा साहित्य का तुलनात्मक अध्ययन, डा.रामछबीला त्रिपाठी, वाणी प्रकाशन–2017.
6. रामानुजा.ओ.आर्.जि जालपुटम्।
7. आधुनिक भारतीयविज्ञान, भोलानाथतिवारी, चौखम्बा पब्लिकेषन्–2004.
8. अनुवादविज्ञानम्, डा.एम्.जि.नन्दनराव, अमर पब्लिकेषन्– 2008.

9. बृहदनुवादचन्द्रिका, डा.चक्रधर नोट्टियाल, दिल्ली पब्लिकेषन्–2009.
10. संस्कृतसाहित्येतिहासः, कपिलदेव द्विवेदी, चौखम्बा पब्लिकेषन्–1999.
11. भारतीयसाहित्य, डा.नागेन्द्र, चौखम्बापब्लिकेषन्–1998